॥ श्रीः ॥

# ॥ गुरुपादुकास्तोत्रम् ॥

नालीकनीकाशपदादृताभ्यां नारीविमोहादिनिवारकाभ्याम् ।
नमज्जनाभीष्टततिप्रदाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥ १

शमादिषट्कप्रदवैभवाभ्यां समाधिदानव्रतदीक्षिताभ्याम् ।
रमाधवांघ्रिस्थिरभक्तिदाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥ २

नृपालिमौलिव्रजरत्नकान्ति सरिद्विराजज्झषकन्यकाभ्याम् ।
नृपत्वदाभ्यां नतलोकपंक्तेः नमो नमः श्रीगुरुपादुकाभ्याम् ॥ ३

अनन्तसंसारसमुद्रतारनौकायिताभ्यां गुरुभक्तिदाभ्याम् ।
वैराग्यसाम्राज्यदपूजनाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥ ४

पापान्धकारार्कपरम्पराभ्यां तापत्रयाहीन्द्रखगेश्वराभ्याम् ।
जाड्याब्धिसंशोषणबाडवाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥ ५

कवित्ववाराशिनिशाकराभ्यां दारिद्र्यदावाम्बुधिमालिकाभ्याम् ।
दूरीकृतानम्रविपत्ततिभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥ ६

नता ययोः श्रीपतितां समीयुः कदाचिदप्याशु दरिद्रवर्याः ।
मूकश्च वाचस्पतितां हि ताभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥ ७

कामादिसर्पव्रजभञ्जकाभ्यां विवेकवैराग्यनिधिप्रदाभ्याम् ।
बोधप्रदाभ्यां द्रुतमोक्षदाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥ ८

स्वार्चापराणामखिलेष्टदाभ्यां स्वाहासहायाक्षधुरन्दराभ्याम् ।
स्वान्ताच्छभावप्रदपूजनाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥ ९

इति श्री शृङ्गेरी जगद्गुरु श्रीसच्चिदानन्दशिवाभिनवनृसिंहभारतीस्वामिभिः
विरचितं गुरुपादुकास्तोत्रं सम्पूर्णम् ॥